शास्त्री तृतीय खण्डस्य कृते साहित्यम्
अलङ्कार विवेचनम्
साहित्य दर्पणः दशमः परिच्छेदः

---

स्वभावोक्तिरलङ्कार विवेचनम्।

'काव्य शोभाकरान् धर्मानलङ्कारान् प्रचक्षते' इत्यलङ्कारेषु स्वभावोक्तिरलङ्कारस्य वर्णनं क्रियते। सामान्यतौ तुरगशावकानां स्वकृत्यकविमात्रसंवेद्यानां बालवधूपक्ष्यादीनां चेष्टादेः स्वभावस्य च वास्तविकं वर्णनं क्रियते चेत् - तत्र स्वभावस्य उक्तियोगेन बुध्यता स्वभावोक्तिः नाम अलङ्कारः।

उक्तं च साहित्य दर्पणे —

'स्वभावोक्ति दुरूहार्थ स्वक्रियारूपवर्णनम्।' इति

उदाहरणं यथा—

'लाङ्गूलेनाभिहत्य क्षितितलम-
सकृद्दारयन्नग्रपद्भ्या-
मात्मन्येवावलीय द्रुतमथ
गगनं प्रोत्पतन् विक्रमेण।
स्फूर्जद्धुङ्कार घोषः प्रतिदिशम-
खिलान् द्रावयन्नेष जन्तून्
कोपाविष्टः प्रविष्टः प्रतिवन-
मरुणोच्छून चक्षुस्तरक्षुः॥'

अत्र ~~तरक्षो~~ कोपाविष्टस्य तरक्षोः स्वाभाविकं क्रियारूपवर्णनात् स्वभावोक्तिरलङ्कारः वर्तते।

उपेन्द्र झा
3/10/20
एसो० प्रो० साहित्य
रा० उ० सं० महावि०
पुरवलिया, पूर्णियाँ

भारती द्वितीय खण्डस्य कृते (साहित्यम्)
वेणीसंहार नाम नाटकस्य श्लोक व्याख्या।

---

'प्रवृद्धं यद्वैरं मम खलु शिशोरेव कुरुभि-
र्न तत्रार्यो हेतुर्न भवति किरीटी न च युवाम्।
जरासन्धस्योरःस्थलमिव विरूढं पुनरपि
क्रुधा सन्धिं भीमो विघटयति यूयं घटयत॥'

प्रस्तुतोऽयं श्लोकः भोज. संस्कृत लेखक दक्षेन चन्द्रशेखराख्येन अलङ्कार विषयेषु निष्णातेन वीर एस. प्रतिपादने लब्धप्रतिष्ठितेन महाकविना भट्टनारायणेन निर्मितः वेणीसंहारनामनाटकस्य प्रथमाङ्कादुद्धृतोऽस्ति। श्लोकेऽस्मिन् सन्धि प्रस्तावेन क्रुद्धः भीमसेनः एव भ्रातरं 'सहदेवं' कथयति —

मम शिशोः एव यद् कुरुभिः वैरं प्रवृद्धं, तत्र आर्यः हेतुः न भवति, न किरीटी नच युवाम्। जरासन्धस्य विरूढम् उरःस्थलम् इव भीम. क्रुधा पुनः अपि सन्धिं विघटयति, यूयं घटयत।

प्रवृद्धमिति – मम = भीमस्य शिशोः = बाल्यात एव कुरुभिः = कौरवैः सह यद् वैरम् = यच्छत्रुत्वम् प्रवृद्धम् = अधिकं जातम् तत्र = तस्मिन् आर्यः = ज्येष्ठो भ्राता युधिष्ठिरः हेतुः = कारणम् न = नैव भवति। न = नहि किरीटी = अर्जुनः, तद्हेतुः भवति न च युवाम् = नकुल सहदेवावपि तत्कारणं न भवतः। जरासन्धस्य = तन्नाम्नो दैत्यस्य विरूढं = भिन्नं उरःस्थलम् = वक्षःस्थलम् इव = यथा भीमः = भीमसेनोऽहम् क्रुधा = रोषेण पुनः अपि = भूयोऽपि सन्धिम् = मैत्रीम् विघटयति = वियोजयति यूयम् = भवन्तः सर्वे घटयत = योजयत।

अत्रोपमालङ्कारः, शिखरिणी वृत्तम्। तल्लक्षणं यथा – रसैः रुद्रैश्छिन्ना यमनसभलागः शिखरिणीति।

उपेन्द्र झा
3/10/20
एसो० प्रो० साहित्य
स० उ० सं० महाविद्यालय
कुरुक्षेत्र, हरियाणा

Oct

शास्त्री प्रथम खण्डस्य कृते (साहित्यम्)
अभिज्ञान शाकुन्तलम् नाम नाटकस्य श्लोक व्याख्या।

"न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे तूलराशाविवाग्निः।
क्व बत हरिणकानां जीवितं चातिलोलं
क्व च निशितनिपाता वज्रसाराः शरास्ते॥"

प्रस्तुतोऽयं श्लोकः कविकुल दिवाकरेण काव्यमालालङ्कारेण संस्कृत साहित्योदधि प्रख्यात अमूल्य कलदायमानेन कविना वनिता विख्यातेन महाकविना कालिदासेन विरचितस्य अभिज्ञान शाकुन्तलम् नाटकस्य प्रथमाङ्कात् उद्धृतोऽस्ति। प्रसङ्गोऽयं तपस्याश्रमं यदा मृगं प्रति रथे स्थितो राजा दुष्यन्तः मृगपार्श्वं प्राप्य शरसन्धानं नाटयति तदा तत्रोपस्थितः कश्चित् वैखानसो हस्तमुद्यम्य राजानं निवारयति।

तूलराशौ अग्निः इव अस्मिन् मृदुनि मृग शरीरे अयं बाणः न खलु न खलु सन्निपात्यः। हरिणकानाम् अतिलोलं जीवितं क्व निशितनिपाताः वज्रसाराः ते शराः च क्व (इति) बत।

तूलः = कार्पासः तस्य राशौ = समूहे अग्निः = स्फुलिङ्गः इव = यथा अस्मिन् = दृश्यमाने एतादृशे तीक्ष्णः बाणः = तीक्ष्ण शरः न खलु = निश्चयेन नैव सन्निपात्यः = प्रयोक्तव्यः। हरिणकानां = क्षुद्रमृगाणाम् अतिलोलं = चञ्चलं जीवितं = जीवनं क्व = कुत्रास्ति, निशितः = तीक्ष्णः निपातः = अग्रभागो येषां ते तीक्ष्णाग्रभागाः वज्रवत् = इन्द्रकुलिशवत् सारं = बलं येषु ते वज्रवत् कठिनाः ते = तव शराः = बाणाश्च क्व = कुत्र सन्तीति बत = खेदे उभयोः सामञ्जस्यं नास्ति। अतएव अत्र मृगे बाणो नैव प्रयोक्तव्य इति।

अत्र पूर्वार्द्धे उपमा मृगशरीरे बाणस्य तूलराशौ अग्निना सादृश्यवर्णनात्। वज्रसाराः इत्यत्र तु लुप्तोपमा। उत्तरार्द्धे हरिणबाणयोः वैषम्य धारनात् विषमालङ्कारः। मालिनी वृत्तम् —
ननमयययुतेयं मालिनी भोगिलोकैः इति।

उपेन्द्र झा
3/10/20
एसो० प्रो० साहित्य
रा० उ० सं० महावि०
कुरुसेला, कटिहार